# ગોવિંદ દામોદર માધવેતિ

(બિલ્વમંગળ આચાર્ય)

કરારવિન્દેન પદારવિન્દં મુખારવિન્દે વિનિવેશયન્તમ્ ।
વટસ્ય પત્રસ્ય પુટે શયાનં બાલં મુકુન્દમ્ મનસા સ્મરામિ ॥ ૧ ॥

શ્રી કૃષ્ણ ગોવિંદ હરે મુરારે હે નાથ નારાયણ વાસુદેવ ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિંદ દામોદર માધવેતિ ॥ ૨ ॥

વિક્રેતુકામા કિલ ગોપકન્યા મુરારિપાદાર્પિતચિત્તવૃત્તિ: ।
દધ્યાદિકં મોહવશાદવોચદ્ ગોવિંદ દામોદર માધવેતિ ॥ ૩॥

ગૃહે ગૃહે ગોપવધૂકદમ્બા: સર્વે મિલિત્વા સમવાપ્ય યોગમ્ ।
પુણ્યાનિ નામાનિ પઠન્તિ નિત્યં ગોવિંદ દામોદર માધવેતિ ॥ ૪ ॥

સુખં શયાના નિલયેનિજેઽપિ નામાનિ વિષ્ણો: પ્રવદન્તિ મર્ત્યા: ।
તે નિશ્ચિતં તન્મયતાં વ્રજન્તિ ગોવિંદ દામોદર માધવેતિ ॥ ૫ ॥

જિહ્વે સદૈવ ભજ સુંદરાણિ નામાનિ કૃષ્ણસ્ય મનોહરાણિ ।
સમસ્ત ભક્તાર્તિવિનાશનાનિ ગોવિંદ દામોદર માધવેતિ ॥ ૬ ॥

સુખાવસાને ઇદમેવ સારં દુ:ખાવસાને ઇદમેવ જ્ઞેયમ્ ।
દેહાવસાને ઇદમેવ જાપ્યં ગોવિંદ દામોદર માધવેતિ ॥ ૭ ॥

શ્રીકૃષ્ણરાધાવર ગોકુલેશ ગોપાલ ગોવર્ધનનાથ વિષ્ણો ।
જિહ્વે પિબસ્વામૃતમેતદેવ ગોવિંદ દામોદર માધવેતિ ॥ ૮ ॥

ભક્તિમિત્ર • bhaktimitra.in